# .. Mahalakshmi Stuti ..

## ॥ महालक्ष्मी स्तुति ॥

राग: करहरप्रिया, ताल: आदि

आदि लक्ष्मि नमस्तेऽस्तु परब्रह्म स्वरूपिणि ।
यशो देहि धनं देहि सर्व कामांश्च देहि मे ॥ १॥
सन्तान लक्ष्मि नमस्तेऽस्तु पुत्र पौत्र प्रदायिनि ।
पुत्रां देहि धनं देहि सर्व कामांश्च देहि मे ॥ २॥
विद्या लक्ष्मि नमस्तेऽस्तु ब्रह्म विद्या स्वरूपिणि ।
विद्यां देहि कलां देहि सर्व कामांश्च देहि मे ॥ ३॥
धन लक्ष्मि नमस्तेऽस्तु सर्व दारिद्र्य नाशिनि ।
धनं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ ४॥
धान्य लक्ष्मि नमस्तेऽस्तु सर्वाभरण भूषिते ।
धान्यं देहि धनं देहि सर्व कामांश्च देहि मे ॥ ५॥
मेधा लक्ष्मि नमस्तेऽस्तु कलि कल्मष नाशिनि ।
प्रज्ञां देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ ६॥
गज लक्ष्मि नमस्तेऽस्तु सर्व देव स्वरूपिणि ।
अश्वांश गोकुलं देहि सर्व कामांश्च देहि मे ॥ ७॥
धीर लक्ष्मि नमस्तेऽस्तु पराशक्ति स्वरूपिणि ।
वीर्यं देहि बलं देहि सर्व कामांश्च देहि मे ॥ ८॥
जय लक्ष्मि नमस्तेऽस्तु सर्व कार्य जयप्रदे ।
जयं देहि शुभं देहि सर्व कामांश्च देहि मे ॥ ९॥
भाग्य लक्ष्मि नमस्तेऽस्तु सौमांगल्य विवर्धिनि ।
भाग्यं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ १०॥
कीर्ति लक्ष्मि नमस्तेऽस्तु विष्णुवक्ष स्थल स्थिते ।
कीर्तिं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ ११॥
आरोग्य लक्ष्मि नमस्तेऽस्तु सर्व रोग निवारणि ।
आयुर्देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ १२॥
सिद्ध लक्ष्मि नमस्तेऽस्तु सर्व सिद्धि प्रदायिनि ।
सिद्धिं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ १३॥
सौन्दर्य लक्ष्मि नमस्तेऽस्तु सर्वालंकार शोभिते ।
रूपं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ १४॥
साम्राज्य लक्ष्मि नमस्तेऽस्तु भुक्ति मुक्ति प्रदायिनि ।
मोक्षं देहि श्रियं देहि सर्व कामांश्च देहि मे ॥ १५॥
मंगले मंगलाधारे मांगल्ये मंगल प्रदे ।

मंगलार्थं मंगलेशि मांगल्यं देहि मे सदा ॥ १६ ॥
सर्व मंगल मांगल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्रयम्बके देवि नारायणि नमोऽस्तुते ॥ १७ ॥
शुभं भवतु कल्याणी आयुरारोग्य सम्पदाम् ।
मम शत्रु विनाशाय दीप ज्योति नमोऽस्तुते ॥ १८ ॥
दीप ज्योति नमोऽस्तुते, दीप ज्योति नमोऽस्तुते॥

Salutations to the Adi Lakshmi, who is the embodiment of the Absolute,
give me fame, give me wealth, fulfill all my desires. 1

Salutations to Santhana Lakshmi, who is the giver of sons and grandsons
give me sons, give me wealth, fulfill all my desires. 2

Salutations to Vidya Lakshmi, who is the embodiment of the Highest Knowledge of the Absolute
give me knowledge, give me the arts, fulfill all my desires. 3

Salutations to Dhana Lakshmi, who is the destroyer of all forms of poverty
give me wealth, give me prosperity, fulfill all my desires. 4

Salutations to Dhanya Lakshmi, who is decorated with all ornaments
give me food grains, give me wealth, fulfill all my desires. 5

Salutations to medhA Lakshmi, who is the destroyer of the evil effects of Kali Yuga
give me wisdom or awareness, give me prosperity, fulfill all my desires. 6

Salutations to Gaja Lakshmi, who is the embodiment of all the Gods
give me horses and cows, fulfill all my desires. 7

Salutations to Dhira Lakshmi, who is the embodiment of Absolute Energy
give me valour, give me strength, fulfill all my desires. 8

Salutations to Jaya Lakshmi, the giver of success in all endeavours
give me victory or success, give me auspicousness, fulfill all my desires. 9

Salutations to bhagya lakshmi, who fosters auspiciousness
give me good fortune, give me prosperity, fulfill all my desires. 10

Salutations to siddhi lakshmi, who abides in the chest of Vishnu
give me success or attainment, give me prosperity, fulfill all my desires. 11

Salutations to Arogya Laksmi, who destroys all diseases and illnesses
give me long life, give me prosperity, fulfill all my desires. 12

Salutations to Siddha lakshmi, the giver of all siddhis

(attainments or spiritual powers)
give me siddhis, give me prosperity, fulfill all my desires. 13

Salutations to Saundarya Lakshmi, one who shines with all decorations
give me beauty, give me prosperity, fulfill all my desires. 14

Salutations to Samrajya Lakshmi, who gives enjoyment and liberation
give me liberation, give me prosperity, fulfill all my desires. 15

Oh Auspicious one, giver of all forms of auspiciousness such as the mangalyam
for the sake of auspiciousness, oh auspicious one, always give me mAngalayam. 16

I salute and take refuge in Narayani, the three-eyed one, who gives
all auspiciousness,
who is herself auspicuous and who fulfils all desires. 17

Salutations to the Flame of the lamp, which gives auspiciousness
and prosperity, gives long and disease free life and destroys all my enemies .18

Encoded by Lakshmanan, Meaning by Badri
Proofread Mrs. K. V. Lalitha

---

Please send corrections to sanskrit@cheerful.com
Last updated October 12, 2008